# রাঘবাষ্টকম্

{॥ রাঘবাষ্টকম্ ॥}

রাঘবং করুণাকরং মুনি-সেবিতং সুর-বন্দিতং

জানকীবদনারবিন্দ-দিবাকরং গুণভাজনম্ ।

বালিসূনু-হিতৈষিণং হনুমৎপ্রিযং কমলেক্ষণং

যাতুধান-ভযংকরং প্রণমামি রাঘবকুঞ্জরম্ ॥ ১॥

মৈথিলীকুচ-ভূষণামল-নীলমৌক্তিকমীশ্বরং

রাবণানুজপালনং রঘুপুঙ্গবং মম দৈবতম্ ।

নাগরী-বনিতাননাংবুজ-বোধনীয-কলেবরং

সূর্যবংশবিবর্ধনং প্রণমামি রাঘবকুঞ্জরম্ ॥ ২॥

হেমকুণ্ডল-মণ্ডিতামল-কণ্ঠদেশমরিন্দমং

শাতকুংভ-মযূরনেত্র-বিভূষণেন-বিভূষিতম্ ।

চারুনূপুর-হার-কৌস্তুভ-কর্ণভূষণ-ভূষিতং

ভানুবংশ-বিবর্ধনং প্রণমামি রাঘবকুঞ্জরম্ ॥ ৩॥

দণ্ডকাখ্যবনে রতামর-সিদ্ধযোগি-গণাশ্রযং

শিষ্টপালন-তৎপরং ধৃতিশালিপার্থ-কৃতস্তুতিম্ ।

কুংভকর্ণ-ভুজাভুজংগবিকর্তনে সুবিশারদং

লক্ষ্মণানুজবৎসলং প্রণমামি রাঘবকুঞ্জরম্ ॥ ৪॥

কেতকী-করবীর-জাতি-সুগন্ধিমাল্য-সুশোভিতং

শ্রীধরং মিথিলাত্মজাকুচ-কুংকুমারুণ-বক্ষসম্ ।

দেবদেবমশেষভূত-মনোহরং জগতাং পতিং

দাসভূতভয়াপহং প্রণমামি রাঘবকুঞ্জরম্ ॥ ৫॥

যাগদান-সমাধি-হোম-জপাদিকর্মকরৈর্দ্বিজৈঃ

বেদপারগতৈরহর্নিশমাদরেণ সুপূজিতম্ ।

তাটকাবধহেতুমংগদতাত-বালি-নিষূদনং

পৈতৃকোদিতপালকং প্রণমামি রাঘবকুঞ্জরম্ ॥ ৬॥

লীলয়া খরদূষণাদি-নিশাচরাশু-বিনাশনং

রাবণান্তকমচ্যুতং হরিযূথকোটি-গণাশ্রয়ম্ ।

নীরজাননমংবুজাংঘ্রিযুগং হরিং ভুবনাশ্রয়ং

দেবকার্য-বিচক্ষণং প্রণমামি রাঘবকুঞ্জরম্ ॥ ৭॥

কৌশিকেন সুশিক্ষিতাস্ত্র-কলাপমায়ত-লোচনং

চারুহাসমনাথ-বন্ধুমশেষলোক-নিবাসিনম্ ।

বাসবাদি-সুরারি-রাবণশাসনং চ পরাংগতিং

নীলমেঘ-নিভাকৃতিং প্রণমামি রাঘবকুঞ্জরম্ ॥ ৮॥

রাঘবাষ্টকমিষ্টসিদ্ধিদমচ্যুতাশ্রয়-সাধকং

মুক্তি-ভুক্তিফলপ্রদং ধন-ধান্য-সিদ্ধি-বিবর্ধনম্ ।

রামচন্দ্র-কৃপাকটাক্ষদমাদরেণ সদা জপেত্

রামচন্দ্র-পদাংবুজদ্বয-সন্ততার্পিত-মানসঃ ॥ ৯॥

রাম রাম নমোঽস্তু তে জয রামভদ্র নমোঽস্তু তে

রামচন্দ্র নমোঽস্তু তে জয রাঘবায নমোঽস্তু তে ।

দেবদেব নমোঽস্তু তে জয দেবরাজ নমোঽস্তু তে

বাসুদেব নমোঽস্তু তে জয বীররাজ নমোঽস্তু তে ॥ ১০॥

॥ ইতি শ্রীরাঘবাষ্টকং সংপূর্ণম্ ॥

Encoded and proofread by

N. Balasubramanian bbalu at sify.com

PSA Easwaran

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Raghava Ashtakam Lyrics in Bengali PDF
% File name : rAghavAShTaka.itx
% Category : aShTaka
% Location : doc_raama
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at sify.com
% Proofread by : N.Balasubramanian bbalu at sify.com

% Latest update : NOvember 28, 2008
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website